चाण्डालिका

[सामाजिकी सामयिकी च द्व्यङ्किका नाटिका].

आचार्य डा० वनेश्वर पाठकः एम०ए०, डी०लिट०
(उत्तर प्रदेश शासनद्वारा साहित्यिक पुरस्कारेण सम्मानितः)
संस्कृत विभागाध्यक्षः
सेंट जेवियर्स कॉलेज, राँची (विहार)

प्रा निकेतनम्
वाराणसी-१
८८२

16
CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लेखक की अन्य कृतियाँ

१ संस्कृत - काव्य - संग्रह

२ काव्यसिद्धान्तकौमुदी

३ प्लवङ्गदूतम् (उत्तरप्रदेश सरकार द्वारा साहित्यिक पुरस्कार - से सम्मानित)

४ स्वप्नवासवदत्तम् (व्याख्या)

५ रघुवंशम् (त्रयोदश सर्ग, व्याख्या,)

६ कुमारसम्भवम् (तृतीयसर्ग, व्याख्या,)

७ कुमारसम्भवम् (पञ्चम सर्ग, व्याख्या,)

८ किरातार्जुनीयम् (द्वितीय सर्ग, व्याख्या,)

९ पञ्चतन्त्रम् (अपरीक्षितकारकम्, व्याख्या)

१० कालिदासः (एकाङ्की नाटक,)

११ रक्तदानम् (नाटक)

१२ कालिदास - साहित्य एवं सन्दर्भ

१३ दिव्यपक्षी (कविता बेल्जियम के एक काव्यसंग्रह (बल्वे) में प्रकाशित, १९७७ ई०)

१४ रक्षाबंधनम् नाटक (मुद्रणस्थ)

१५ यीशुचरितम् (बाइबिल-न्यू टेस्टामेंट का संस्कृत-पद्यानुवाद) (मुद्रणस्थ)

१६ मम्मटाचार्य का काव्यप्रकाश और उसके टीकाकार (रांची-विश्वविद्यालय द्वारा डी० लिट्० उपाधि से सम्मानित, (प्रकाश्यमान)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्राच्य पाश्चात्यविद्ययोः परमविदुषे
डॉ. सत्यव्रत शास्त्रिणे सादरं सुपायनीकृतेयं
—चाण्डालिका।

चाण्डालिका

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Ko

॥ श्रीः ॥

चाण्डालिका

(सामाजिकी सामयिकी च द्व्यङ्किका नाटिका)

—: ० :—

प्रणेता

आचार्य डॉ० बनेश्वर पाठक :, एम० ए०, डी० लिट०

(उत्तरप्रदेशशासनद्वारा साहित्यिकपुरस्कारेण सम्मानितः)

संस्कृत-विभागाध्यक्षः

सेंट जेवियर्स कॉलेज, राँची (बिहार)

—: ० :—

किशोरविद्यानिकेतनम्

भदैनी वाराणसी-१

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रथमं संस्करणम् १९८२ खृष्टीस्तवर्षम्, जनवरीमासः

(सर्वेऽधिकाराः लेखकाधीनाः)

मूल्यं—४ रूप्यकाणि

प्रकाशकः

श्रीनन्दकिशोरद्विवेदी

किशोरविद्यानिकेतनम्

मदैनी, वाराणसी (उ० प्र०)

मुद्रकः—सुभाष प्रिंटिंग प्रेस, महावीर चौक, रांची।

-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Ko

प्रास्ताविकम्

काव्यरचनाया विविधासु विधासु नाटकमेका महत्त्वपूर्णा विधा। रमणीयताया दृष्ट्या तु नाटकं काव्यम् (श्रव्यम्) अतिशय्य वर्तते। अतिप्राचीनकालतः प्रचलितेयमुक्तिरप्यमुमेवार्थं पुष्णाति :'काव्येषु नाटकं रम्यम्' इति। 'अवस्थानुकृतिर्नाट्यम्' इति परिभाषितत्वमेवादत्रानं नाटकं अन्यकाव्यापेक्षया जनजीवनेन सह समधिकं सम्पृक्तमास्ते। देश-काल-परिस्थितीनामनुसारं जनमनोरञ्जनं नाटकस्य परमं प्रयोजनम्। नाटकं विद्वत्समाजस्य सामान्यजनसमाजस्य च कृते समरूपमेवोपयोगि विद्यते। नाटककारः समाजं प्रति समधिकनिष्ठावान् भवति। अतएव पौराणिकम् ऐतिहासिकं वा ख्यातवृत्तमाश्रित्य लिखितेषु संस्कृतनाटकेषु सर्वजनमनःसमारा-

सर्वजनोपयोगिता च महत्त्वपूर्णा भूमिकामावहत्तः। प्राचीनशैलीं तथा पौराणिकं विषयमाधृत्य लिखितेषु प्राचीननाटकेष्वपि समसामयिकैः संविधानैर्विचारैश्च नवीनतामाधातुं श्लाघनीयः प्रयासः कृतो विद्यते। 'पुराणमित्येव न साधु सर्वम्" इति क्रान्तिकारि वचो ब्रुवतः कालिदासस्यापि पौराणिकाख्यानानां नवेषु प्रतिमानेषु रूपान्तरीकरणमभिमतं प्रतिभाति।

अस्माकं प्राक्तनानि काव्यनाटकानि यद्यपि पौराणिकानि प्राचीन-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालतो लोकख्यातानि वा इतिवृत्तान्यादाय निर्मितानि सन्ति तथापि तेषु नवीनविचारोन्मेषो दृश्यते। अधुना वैज्ञानिकाविष्काराणां विशेषतश्चलचित्तस्य प्रभावात् परिवर्त्तितां जनमनोवृत्तिमभिलक्ष्य तस्यास्तोषाय नवीनं धरातलमाधृत्य नवां समस्यां समाश्रित्य च निर्मितेषु काव्यनाटकेषु युगानुगा प्रवृत्तिः परिलक्ष्यते। अस्मिन् भौतिके युगे समस्यानामनेकासामभ्युदयात् काव्यनाटकेषु समसामयिकसमस्यानां तासां समाधानानाञ्च निर्देशः आवश्यकः। आधुनिकाः साहित्यकाराः साम्प्रतिकीं युगानुरूपां प्रवृत्तिं पुरस्कृत्य काव्यनाटकादीनां निर्माणे निरताः सन्तीति सन्तोस्य विषयः।

आधुनिकानि संस्कृतनाटकानि आकाशवाण्याऽपि प्रभावितानि सन्ति। आकाशवाण्या विभिन्नकेन्द्रेभ्यः संस्कृतस्य रूपकाणि प्रतिमासं प्रसार्यन्ते। आधुनिकनाटककारेषु केचन आकाशवाणीरूपकाणाम् (रेडियोरूपकाणाम्) अपि निर्माणे प्रवृताः सन्ति। आकाशवाण्या इयं संस्कृतसेवा श्लाघनीयाऽस्ति।

अस्यां नाटिकायां भारतीयसमाजस्य विघटनकारिण्या अस्पृश्यताया भावनाया उन्मूलनाय प्रयासो विहितोऽस्ति। भगवतो बुद्धस्य प्रियशिष्य आनन्दः श्रावस्तीनगरे कस्यचिद् गृहस्थस्य गृहे व्रतस्य पारणां कृत्वा विहारं प्रत्यावृत्तः पथि तृषार्त्तः सन् चाण्डालानां वसतौ कूपात् जलं निःसारयन्तीं चाण्डालकन्यां प्रकृतिमवलोक्य तां जलं याचते। चाण्डालकन्या तस्मै जलं ददाति। आनन्दस्योदारहृदयतया रमणीयाकृत्या च प्रभावितो सा चाण्डालकन्या प्रतिदिनं तस्मिन्कूपतटे तं प्रतीक्षते। अन्ते मन्त्रविद्याविदो मातुः साहाय्येन सा वसुन्धरानाभवशीकरणमन्त्रद्वारा तमाकर्षितुमीहते। आनन्दो मन्त्रशक्त्याऽभिभूतश्चाण्डालकन्याया गेहमागच्छति। भगवानबुद्धः स्वीयाऽलौकिकशक्त्या स्वशिष्यस्य तां दुर्बलतां विज्ञाय स्वमन्त्रबलेन चाण्डाल्या वशीकरणविद्यां शक्तिहीनां करोति। आनन्दो विगालितानुतापः सानन्दः प्रत्यावर्त्तते।

-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Ko

बौद्धसाहित्ये प्रसिद्धामिमामेव मातङ्गकन्याकथामाधारीकृत्य विश्वकवी रवीन्द्रनाथठाकुरः स्वां 'चाण्डालिकाम्' निर्मितवान्। सर्व एव मानवा मानवजातीयाः, न ते ब्राह्मणाचाण्डाला वा, सर्वमेव जलं पवित्रं यत् तृषार्तं तृप्तं. तप्तं च शीतलं करोति, श्रावणस्य कृष्णमेघस्य चाण्डालेतिनामकरणेन तस्य जातिर्न परिवर्त्तते, न वा तस्य जलीयो गुणो विनश्यति, विधानं तत्,यत्र केवलं शासनमेवास्ति सान्त्वना नास्ति, स्वीकार्यं न इत्येवमादिभिर्विश्वकवेरुदारभावनाभिरभिभूतोऽहं चाण्डालिकायाः संस्कृतरूपान्तरीकरणे प्रवृतोऽभवम्।अस्मिन् प्रयासे मया विश्वकवेर्भावनानामवबोधे यत्र यत्र काठिन्यमन्वभावि तत्र तत्र सर्वत्र च मया वङ्गीयसाहित्यस्य प्रख्यातविदुषः प्राध्यापकश्रीमथुरानाथवन्द्योपाध्यायस्य बहुमूल्यः सहयोगो गृहीतः। अहं निर्व्याजेन मनसा मित्रवरश्रीवन्द्योपाध्यायं प्रति कृतज्ञतां ज्ञापयामि ! अस्मिन् प्रसङ्गे राँचीविश्वविद्यालयीयस्नातकोत्तरवङ्गसाहित्यविभागाध्यक्षस्य डॉ० चित्तरञ्जन लाहामहोदयस्य सत्परामर्शोऽपि मे प्रेरणादायकोऽभूत्। तदर्थमहं डा० लाहामहोदयस्याभारमावहामि। अत्र मे हृदयं न्यूनतामनुभविष्यति यद्यहं कृतेरस्याः प्रकाशकस्य श्रीनन्दकिशोरद्विवेदिनः (वाराणसीस्थकिशोरविद्यानिकेतनस्य व्यवस्थापकस्य) तथा मुद्रकस्य झोपाहृवस्य भी जयचन्द्रस्य नाम न गृह्णामि। वस्तुतस्तयोः सहयोगेनैव कृतिरियं स्वल्पेन समयेन प्रकाशमधिगता। शीघ्रतायामस्यां सम्भूतास्त्रुटयः सहृदयैः पाठकैः क्षमापथमानेया इति मे सुबहुशोऽनुरोधः।

अन्ते, गुणैकदृशः परगुणपरमाणून् पर्वतीकृत्य निजहृदि विकसन्तः सन्तोऽत्रापि कमपि तोषमनुभविष्यन्तीति साहसमादधानो भवतां समक्षं प्रस्तौमि 'चाण्डालिकाम्' इमाम्, स्वस्या अक्षमतायाश्च कृते क्षमां याचमानःसमापयामि च प्रास्ताविकमिदम्।

२०३८ वैक्रमाब्दीया
श्रीवसन्तपञ्चमी
राँची।

विदुषामाश्रवः
वनेश्वर पाठकः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Ko

चाण्डालिका

प्रथमोऽङ्कः

(नान्दी)-स्वादं स्वादं शबरशुतया श्रद्धया सञ्चितानि
कर्कन्धूनां सुमधुरफलान्यादरेणोपभुज्य ।
प्रीतः, प्रीतिप्रमुदितमनाः सर्वलोकाभिरामो
रामो हृत्वा सकलकलुषं सन्ततं शन्तनोतु ॥१॥
प्रीतिः सा काऽपि राजस्य हार्दिकौदार्यशालिनी।
सामाजिकमनौदार्यं द्रुतं दूरीकरोतु नः ॥२॥

(नान्द्यन्ते सूत्रधारः)

सूत्र० – अलमतिविस्तरेण । (नेपथ्याभिमुखमवलोक्य) आर्ये ! यदि गृहकार्यमवसितम्, तदिहागम्यताम् ।

नटी — (प्रविश्य) आर्य ! इयमस्मि किं क्रियताम् !

सूत्र० — आर्ये ! सुरभारतीसमुपासकानां परिषदियमस्माकं कमपि नवीनं प्रयोगं द्रष्टुमुत्सुका वर्तते । तदस्याः समाराधनाय चाण्डालिकानामनाटिकां प्रयोक्तुमिच्छामि तत् प्रस्तूयतां काचन अभिनवरागबद्धा मनोहारिणी गीतिः, ।

नटी --- यदार्य आज्ञापयति । (नृत्यन्ती गायति)
नगरे नगरे ग्रामे ग्रामे क्रीडतु संस्कृतवाणी

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

भवने भवने वदने वदने नृत्यतु संस्कृतवाणी ।।
।।नगरे नगरे०।।
वेदस्मृतिप्रतिपादितकर्म–धर्माद्याचरणानि ।
पुनः प्रकाश्य मनस्तिमिराणि हरतु हरतु सर्वाणि।।
।।नगरे नगरे०।।

विश्वबन्धुताभावोत्कर्षं मनसि मनसि सुखशान्तिप्रहर्षं
राष्ट्रभावनासुधाभिवर्षं विदधतु तव वचनानि ।
अमरभारतीश्रिया सुहासिनी जयतु जयतु कल्याणी ।।
।।नगरे नगरे०।।३।।

सूत्र०— अहो ! रागपरिवाहिणी ते गीतिः । आर्ये ! तव गीतिमाधुर्येणापहृत-चेता मन्त्रमुग्ध इवाभाति सर्वतो रङ्गः । तत् प्रयोगेणाधिक्रियतामिदानीं चाण्डालिका ।

नटी — आर्य! वासवदत्ताम्, शकुन्तलाम्, उर्वशीम्, मालविकाम्, रत्नावलीम्, प्रियदर्शिकाम् विहाय चाण्डलिकां प्रति कः श्रद्धावान् भविष्यति ?

सूत्र० — आर्ये ! सत्यमेतद् यदिमानि नाटकानि प्राक्तनानि, प्रावततैर्यशस्विभिर्महाकविभिर्विरचितानि सुप्रतिष्ठितानि च सन्ति । तथापि 'पुराणमित्येव न साधु सर्वम्, इति महाकविकालिदासवचस्तु श्रद्धेयमेव । अतएव साम्प्रतं साम्प्रतिकसमस्योपेतानि नूतनवस्तूपहितानि नवसंविधानकानि काव्यनाटकादीनि निर्मातुं नितरां निरताः सन्ति साम्प्रतिकाः कविवराः । तत् समाजस्य राष्ट्रस्य चैक्यशक्तिं क्षीणतां प्रापयितुं प्रसृतामस्पृश्यताया भावनां दूरीकर्तुमेव निर्मितेयं चाण्डालिका महते उपयोगाय कल्पिष्यते, परिषदोऽस्याः समाराधनाय च सम्पत्स्यते इति मे सुदृढो विश्वासः । अत्रैवास्माकं प्रयोगस्य साफल्यम् । तत् प्रतिपात्रमाधीयतां यत्नः, येन किमप्यस्माकं परिहास्यतां न गच्छेत् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नटी— सुविहितप्रयोगतया आर्यस्य किमपि न परिहास्यते। तथापि विदुषां परितोषाय यत्नस्तु करणीय एव। आर्य ! चाण्डालिकाया निर्माता कः, इति मया विस्मृतम्। तदहं तं नाम्ना श्रोतुमिच्छामि।

सूत्र०— त्वमपि किमपि विस्मरसि, इत्याश्चर्यमिवाभाति मे। अस्तु. शृणु। विश्वकवी रवीन्द्रनाथठाकुरश्चाण्डालिकाया मूललेखकः। अस्याः संस्कृत-रुपान्तरकारः, नवेन संविधानकेन किञ्चित् परिवर्त्तनेन च प्रयोजको वर्त्तमाननाटककार आचार्य डाक्टरवनेश्वरपाठकः।

नटी — किम् आचार्यपाठकः स एव, येन

निर्माय लोकरुचिरं नवभावभव्यं
नाट्यं नवं नवविधं खलु रक्त दानम्।
क्रान्ति नवां जनयता जनमानसेषु
संसेव्यते सुरगवी विबिधाऽभ्युपायैः ॥४॥

सूत्र० — आम् ! स एव, य इदानीं संस्कृतसेवायां समर्पितजीवनोऽनेक-विधैर्यत्नैः सुरभारतीं समुपासते। तस्यैवेयमपराऽभिनवा कृतिश्चाण्डालि-काऽस्माभिः प्रयोगेऽवतारणीयाऽस्ति। तदेहि, अनन्तरकरणीयं सम्पादयावः।

नटी — यदाज्ञापयत्यार्यः। (उभौ निष्क्रान्तौ)

प्रस्तावना

——:+:——

(प्रथमं दृश्यम्)

स्थानम् — श्रावस्तीनगरस्य दक्षिणे भागे चाडालानामावसतिः, तत्र चाण्डालानां कूपः।

समयः — मध्याह्नः, वैशाखस्य दुःसह आतपः !

(चाण्डालानां बालिकाः कूपात् जलमादाय स्वं स्वं गृहं प्रत्यागच्छन्ति। ततः प्रविशति जलपात्र (घट) हस्ता चाण्डालकन्या प्रकृतिः। सा कूपात् जलं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

निःसार्यं मन्दं मन्दं किमपि गायन्ती मातृहीनं गोवत्सं स्नपयति । अत्रान्तरे गौतमबुद्धस्य प्रियशिष्य आनन्दः सशिष्यः प्रविशति ।)

आनन्दः— बुद्धो सुसुद्धो करुणामहार्णवो
योच्चन्त सुद्धब्बर ज्ञानलोचनो
लोकस्स पापूपकिलेसघातको
वन्दामि बुद्धं अहमादरेण तम् ॥६॥

(प्रकृतिः किमप्यनाकर्णयन्तीव स्वकर्मणि व्यापृता तिष्ठति)

आनन्दः — (किञ्चिदुच्चैः स्वरेण) जलं देहि, जलं देहि ।

प्रकृतिः – (श्रुत्वा सम्भ्रान्तेव) आर्य ! इयं चाण्डालानामावसतिः । अयं चाण्डालानां कूपः । अहञ्च चाण्डालकन्या । तद् दूरत एव सशिष्य भवन्तं प्रणमामि । (शिरोऽवनमय्य बद्धाञ्जलिस्तिष्ठति) ।

आनन्दः — (तथैव) जलं देहि , जलं देहि ।

प्रकृतिः – आर्य ! चाण्डालकन्याऽहं जात्या ऽपवित्रा, जलमप्यस्य कूपस्यापवित्रम् । तत्कथमहं भवते जलं दद्याम् !

आनन्दः —अबोधबालिके ! श्रावणस्य कृष्णमेघस्य चाण्डालेतिनामकरणेन किं तस्य जातिः परिवर्त्तते ? किं वा तस्य जलीयो गुणो विनश्यति ! अहं मानवजातीयोऽस्मि, त्वमपि मानवजातीया । आवयोर्जातिरेकैव । अपि च समाजसेवापरायणा त्वज्जातिरत्युत्तमा ।तव हस्तगतं जलमपि पवित्रम् । सर्वमेव जलं तीर्थजलमस्ति यत् तप्तं शीतलं करोति, तृषार्तञ्च तृप्त करोति । तत्, जलं-देहि, जलंदेहि ।

(प्रकृतिर्वेपमानेन हस्तेन घटात् जलमावर्जयति, आनन्दः एकचुलुकं जलं पीत्वा 'बुद्धो सुसुद्धो' इति पठन् सशिष्यो निर्गच्छति, प्रकृतिस्तमवलोकयन्ती तिष्ठति । प्रकृतेर्माता तामन्विष्यन्ती प्रविशति ।)

माता — प्रकृते ! अयि प्रकृते ! कुत्र गतासि ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रकृतिः — अत्राऽस्मि मातः ! अत्रैवास्मि ।

माता — कुत्र ?

प्रकृतिः — अत्रैव कूपतटे । (प्रकृतिर्मातरमुपसर्पति)

माता —आश्चर्यं कुरुषे त्वम् ! मध्याह्नमतिक्रम्य कालो वर्त्तते । काष्ठभेदो आतपोऽस्ति । भूमिर्ज्वलति । भूमौ पदन्यासोऽपि कठिनः । गृहे प्रत्यूषादेव जलं न विद्यते । जलमादाय त्वरितं गृहमागच्छ ।

प्रकृतिः — इयमागच्छामि । (प्रकृतिः कूपात् जलमादाय मातरमनुसरति । उभे निष्क्रान्ते ।)

——:+:——

(द्वितीयं दृश्यम्)

थलनम् – कूपतटम् । समयो मध्याह्नः । प्रकृतिः कूपतटे स्थिता कमपि प्रतीक्षमाणेवोत्कण्ठिता दृश्यते । तिस्रश्चाण्डालकन्याः स्वस्वप्रमाणानुरूपान् घटानादाय जलमानेतुं कूपतटमायान्ति । सर्वास्तास्तादृशीं प्रकृतिमवलोय तामुपहसन्त्यः पृच्छन्ति ।)

प्रथमा — अयि प्रकृते ! अस्मिन् प्रचण्डातपे कं पुरुषं प्रतीक्षमाणा कूपतटेऽत्र स्थिताऽसि ?

द्वितीया— (प्रकृतेर्मुखमुन्नमय्य) मन्येऽस्माकं प्रियसखीयं तमेव राजकुमारं प्रतीक्षते, यो गतदिवसे मृगयातः प्रतिनिवृत्तोऽनेन पथा व्रजन्नत्र क्षणं स्थित्वा इमां सतृष्णं विलोकयन् राजभवनं प्रति गतः ।

तृतीया— अहो ! तदियं महाराज्ञीपदप्राप्तेः स्वप्नं पश्यति ।

प्रथमा — अथ किम् ! प्रकृतिर्महाराज्ञी भविष्यति । (मुखमुन्नमय्य) अस्या रूपमेवेदृशं यदियं कस्यापि राज्ञोऽन्तःपुरमवश्यमलङ्करिष्यति ।

द्वितीया — अवश्यम् , अवश्यम् ? अस्माकं प्रकृतिः शकुन्तलाऽस्ति । कश्चन दुष्यन्तोऽस्या रूपज्वालायां पतङ्गायिष्यते ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीया—अहन्तु पश्यामि, तद्दिनं समीपमेव वर्त्तते। अहो! इयं चाण्डालिका महाराज्ञी भविष्यति, चाण्डालिका महाराज्ञी भविष्यति।

प्रकृतिः—यूयमपसरत। यूपं मामुपहसितुमिहागताः। अहमितो गच्छामि। (गन्तुमिच्छति)

प्रथमा—(पन्थानमवरुध्य) नहि नहि, महाराज्ञि! मा कुप्य, मा कुप्य। मुहूर्तं-विरम, स राजकुमार आगच्छत्येव। किन्तु पश्य, तस्माद् दुष्यन्तादात्मानं रक्ष। अन्यथा शकुन्तलेव त्वमपि परित्यक्ता भविष्यसि।

द्वितीया — (प्रकृतेर्मुखमुन्नमय्य) प्रकृते! सत्यं वद, किं स राजकुमारस्त्वां दृष्ट्वा मोहितोऽभवत्?

प्रकृतिः — मोहितो नाऽभवत्, तर्हि किमभवत्? मृगयायां बहिर्निर्गतोऽसौ राजकुमारः परिभ्रमन् कूपतटमिदं समायातः। स मामवलोक्य विस्मृतवान् यदहं मानवी अस्मि। स पशोराखेटं कर्तुं विनिर्गत आसीत्। तस्याक्ष्णोः केवलं पशुरेवादृश्यत। स तं पशुमेव स्वर्णशृङ्खलया बद्धुमैच्छत्।

द्वितीया — किं स त्वामेव तं पशुं मत्वा तव मुखं लक्ष्यीकृतवान्?

प्रथमा — स न लक्ष्यीचकार स स्वयमेव लक्ष्यीभूतः। आखेटं कर्तुं निर्गत आसीत्, किन्तु स स्वयमेवाखेटकं सञ्जातः।

प्रकृतिः — अहं तं राजकुमारं द्रष्टुं नेच्छामि। अहन्तु तं बौद्धभिक्षुं प्रतीक्षे यो मम हस्ताद् जलं पीत्वा व्रतस्य पारणामकरोत्।

तृतीया — (साश्चर्यम्) बौद्धभिक्षुस्तव हस्ताद् जलं पीतवान्? प्रकृते! त्वमिदं किं कथयसि?

प्रथमा — इयमुन्मत्ताऽस्ति। बौद्धभिक्षुश्चाण्डालिकाया हस्ताज्जलं ग्रहीष्यति एतत् कः श्रद्धास्यति? इयं सत्यमुन्मत्ताऽस्ति। तदेत, जलमादाय गृहं गच्छामः। इयं दुःसहेऽस्मिन्नातपे बौद्धभिक्षोः प्रतीक्षायां तपस्यतु।

(प्रकृतिं विहाय सर्वा जलमादाय निष्क्रान्ताः)

माता — (प्रविश्य) प्रकृते! अयि प्रकृते! कुत्र गतासि! न जाने किं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सञ्जातं बालिकायाः । गृहे दृश्यत एव न !

प्रकृतिः — अत्रैवास्मि मातः ! अत्रैवास्मि ।

माता — कुत्र ?

प्रकृतिः — अत्रैव कूपतटे ।

माता—आश्चर्यं कुरुषे त्वम् । विनापि किमपि कार्यं त्वं वैशाखीये प्रचण्डातपे गृहान्निर्गताऽसि । श्रुतं मया पुरावृत्तं यदुमा गृहं परित्यज्य बहिरातपे तप्त्वा तपश्चकार । किं तवापि तदेव सञ्जातम् ?

प्रकृतिः— (मातरमुपसृत्य) आम्, मातः ! अहन्तु तपः करोम्येव ।

माता—त्वमात्मवृत्त्या विस्मायसि माम् । कस्य कृते तपः करोषि त्वम् ?

प्रकृतिः— यो हि मामाहूतवान् ।

(गीतिः)

यो हि मामाहूतवान्निह यो हि मामाहूतवान् ।
यो हि मह्यं वाग्विरहितायं सुवाचं दत्तवान् ।
ज्ञातवान् यो नाम मे यो नाम मे विज्ञातवान् ।
तस्य नामास्ते मनसि मे यो हि मामाहूतवान् ॥५॥

माता— कस्त्वामाहूतवान् ?

प्रकृतिः—यो हि 'जलं देहि' इति निगद्य मे अन्तस्तारं झङ्कृतवान् ।

माता— अयि दग्धमुखि ! 'जलं देहि' इति त्वामुवाच ! अहं शृणुयाम्--केन प्रोक्तमिदम् । किमसौ त्वज्जातीयः कश्चनासीत् ?

प्रकृतिः— इदमेव तु तेन प्रोक्तं यदहं तव सजातीय एव ।

माता— किं त्वया स्वजातिर्नापह्नुता ? किं प्रोक्तं त्वया यत् त्वं चाण्डालिकासि ?

प्रकृतिः— मया प्रोक्तम् ! किन्तु सोऽवदत् । अलीकमेतत् । श्रावणस्य कृष्णमेवस्य चाण्डालितिनामकरणेन किं जायते ? तेन तस्य जातिर्न परिव-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

र्त्तते। न वा तस्य जलीयो गुणो विनश्यति। तेन कथितम्--आत्मानं मा गर्हय, आत्मगर्हणा आत्महत्यातोऽप्यधिकतरं पापमस्ति।

माता— तव मुखादहमिदं किं शृणोमि! किं त्वमिदानीमात्मनः पूर्वजन्मनो वृत्तान्तं स्मरसि?

प्रकृतिः— एष वृत्तान्तो मम नवजन्मनोऽस्ति।

माता — तव वार्त्ता मे हासं जनयति। नव जन्म! कदाऽभूत् ते नवजन्म?

प्रकृतिः— तस्मिन् दिने राजभवने मध्याह्नवेलाया घण्टिकाऽवाद्यत। अतीव प्रचण्ड आतप आसीत् तदानीम्। अहं मातृहीनं गोवत्सं जलेन स्नपयन्त्यासम्। न जाने कियच्चिरात् पीतवस्त्रो बौद्धभिक्षुर्मे सम्मुखं स्थित आसीत्। तेनोक्तम् -'जलं देहि'। मे प्राणाश्चमत्कृता अभूवन्। मम शरीरमकम्पत। अहं दूरादेव तं प्रणतवती। उषाया आलोकेन तस्य रूपं निर्मितमासीत्। मया प्रोक्तम्-- 'अहं चाण्डालकन्याऽस्मि, कूपजलमपवित्रमस्ति। स आह- 'अहं यः मानवोऽस्मि, त्वमपि स एव मानवोऽसि। सर्वमेव जल तीर्थजलमस्ति यत् तप्तं शीतलं, तृषार्त्तञ्च तृप्तं करोति। मया सर्वप्रथममीदृशी वार्त्ता आकर्णिता। यस्य चरणरजः स्प्रष्टुं मे शरीरं प्रकम्पेत तस्मै मया सर्वप्रथममेकचुलुकं जलं दत्तम्।

माता--- अयि अबोधबालिके! त्वयि सहसा एतादृशः साहसः कथमुदपद्यत? त्वया अस्य प्रायश्चितं कर्त्तव्यं भविष्यति। किं न जानासि यत् कस्मिन् कुले तव जन्म?

प्रकृतिः--केवलमकचुलुकमेव जलं तेन मे हस्तास्ताद् गृहीतम्। तज्जलमगाधमसीमञ्च सञ्जातम्। तस्मिन् मे कुलं निमग्नम्। मम जन्म प्रक्षालितमभूत्।

माता-- तव मुखस्य वार्तैव परिवर्त्तिता। तव वाणी मन्त्रप्रभाविना प्रतिभाति त्वं किं कथयसीति किं त्वं स्वयं वेत्सि?

प्रकृतिः-- वेद्मि मातः! सत्यम् वेद्मि। किं कृत्स्ने श्रावस्तीनगरे जलं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नासीत् ? कथमिममेव कूपमुपागमत् सः ? अयमेव तु मम पूर्वजन्मनो वृत्तान्तोऽस्ति। तेन मह्यं मनुष्यस्य तृशातर्पणाय सम्मानितोऽधिकारः प्रदत्तः। इदमेव महापुण्यं सोऽन्विष्यन्नासीत्। येन जलेन तस्यव्रतं पूर्णतामगात्, तज्जलं तु तस्यान्यत्र कुत्रापि दुर्लभमासीत्, कस्मिन्नपि तीर्थे तस्य दुर्लभमासीत्। तेन प्रोक्तम् -'बनवासारम्भ एव जनकतनया जलेऽस्मिन् स्नानमकरोत्। तज्जलं चाण्डालेन गुहेन स्वगृहमानीतम्। ततः-प्रभृति मे मनोमयूरो नृत्यति। गम्भीरध्वनिमिममहं रात्रिन्दिवं शृणोमि जलं देहि जलं देहि,

भाषतेऽसौ जलं देहि, देहि मे त्वं जलं देहि।
'अहं दास्यामि', प्रदत्तः केन एष हि सम्बलः।
कृष्णमेवं तृषितदृष्ट्या वीक्षमाणो विह्वलः।
चातकस्तमुपागमत्—त्वं देहि मे त्वं जलं देहि।
उत्सधारा भूतले कारागृहे तमसावृते
आवृता आसीत्, सुवाणी तत्र कृष्णशिलातले
कस्य आघातं चकार—देहि मे त्वं जलं देहि ॥६॥

माता--वत्मे ! न जाने कथं ते वचनं मे न रोचते ! तेषां मन्त्रमिममहं नवेद्मि। अद्याहं तव वचनं नाभिजानामि, श्वस्तव मुखं नाभिज्ञास्यामि। तेषां मन्त्र एष तु प्राणपरिवर्त्तकोऽस्ति।

प्रकृतिः-- अद्यावधि त्वमभिज्ञातुं नाशकः। येनाभिज्ञाताऽस्मि स एवाभिज्ञानं कारयिष्यति। अतोऽहं प्रतीक्षां करोमि। राजद्वारे मध्याह्नघण्टिका नदति। बालिकाः स्वं स्वं गृहं जलं नयन्ति। दूरगगने शंखचिल्ल उत्पतति अहं पथः समीपे कूपतटे उपविष्टाऽस्मि।

माता-- कस्य कृते ?

प्रकृतिः-- पथिकस्य कृते ?

माता-- उन्मत्ते ! कः पथिकस्त्वामुपैष्यति ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रकृतिः-- केवलः स एव पथिकः, स एव पथिकः। तस्य मनसि वर्त्तते यत् संसारस्य सर्वेषामेव पथां सर्वे पथिकाः सन्ति। दिनात् परं दिनं व्यतीतम्, अधुनाऽप्यसौ पथिको नायातः। मुखेन तु तेन किमपि नोक्तम्, पुनरपि तेन वचनं दत्तम्। किन्तु तेन स्वं वचनं परिपालितं कथं न? मम मनो, यन्मरुभूमिरिव सञ्जातमस्ति, कृत्स्नं दिनं धू धू कृत्य ज्वलति उष्णो वायुरिव हू-हू इति कुरुते, तज्जलं दातुमाकुलमस्ति। कोऽप्यागत्य जलं याचते न।

नेत्रे मे तृष्णया व्याप्ते मनो मे तृष्णयाकुलम्।
अहं वृष्ट्या विरहितं वैशाखदिवसं यथा॥
सन्तापेन प्रदह्यन्ते प्राणा मेऽहर्निशं भृशम्।
वायौ निदाघतप्तेऽस्मिन्नुत्थितोऽस्ति प्रभञ्जनः॥
मनः सुदूरशून्ये मे नयत्युत्पातयन्नसौ।
यतोऽपसर्तुं मारब्धमस्ति यच्चावगुण्ठनम्॥
काननं येन कुसुमेनासीत् सम्यक् सुशोभितम्॥
इदानीं तद्धि कुसुमं शुष्कं सत् कृष्णतां गतम्॥
निर्झरः केन बद्धोऽस्ति केन बद्धोऽस्ति निर्झरः।
असौ दुःखस्य शिखरे बद्धस्तापप्रतापतः॥७॥

माता-- अहं तवाद्यतनीं वार्तामिमामवगन्तुं न शक्नोमि। न जाने त्वं केन मदेनाभिभूताऽसि? त्वं किमिच्छसीति व्यक्तं ब्रूहि माम्।

प्रकृतिः-- अहं तमभिलषामि यः सहसा समागत्य मामवेदयत्--अस्माकं सेवाऽपि विधातुः सृष्टेरपेक्षिता भविष्यति. इयती महती आश्चर्यवार्ता। अहं सेविकाऽस्मीति कथामिमां स धूलित उत्थाप्य स्ववक्षसः समीपं निहितवान्, एतद्धत्तूरपुष्पम्।

माता-- प्रकृते! त्वया स्मर्तव्यं यत् तेषां वार्ता केवलं कर्णे करणीयाऽस्ति, कार्ये परिणमनीया नास्ति। भाग्यदोषात् यस्मिन् कुले तव जन्म,तस्य कुलस्य पङ्कनिर्मितां भित्तिं भेत्तुं समर्था कापि लोहखनिः कुत्रापि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

निर्मिता नास्ति । त्वमपवित्राऽसि । त्वं यत्र वर्त्तसे तत्रैव सावधानं तिष्ठ । तस्मात् स्थानाद् बहिर्निर्गमनं त्वत्कृते सर्वत्रैवापराधोऽस्ति । वत्से ! त्वं विस्मरसि यद् दासीरूपेव त्वमुत्पन्नाऽसि । विधातृलिखितं प्रोज्झितुं कः समर्थः ?

प्रकृतिः—धिक्, धिक्, मातः ! अहं पुनस्त्वां ब्रवीमि—मा विस्मर, मिथ्यैवात्मनिन्दां मा कुरु । आत्मनिन्दा पापमस्ति पापमस्ति । राज्ञः कुलेऽपि गृहे गृहे कियत्यो दास्य उत्पद्यन्ते, अहं दासी नास्मि । ब्राह्मणकुलेऽपि देशे देशे कियन्तश्चाण्डाला जन्म गृह्णन्ति, अहं चाण्डालिका नास्मि ।

ाता— त्वया सह कथमहं सम्भाषे, इत्यहं न वेद्मि ।

ाकृतिः - पुष्पं ब्रूते देव ! सर्वथा भूमावेव हि धन्यमहं यत् ।
सेवा ते भद्रे रिभाग्यतो गेहे मे भवतीह पवित्रा ॥
अह धूलिजन्मेति कदाचिन्मनो न ही मे स्मृतिरभ्येतु ।
यतः प्रभो ! मे हृदयस्यान्तर्धूलिकणोऽपि न दृष्टिमुपैति ॥
नेत्रे स्वीये नमयस्व त्वं भृशं वेपते पत्रदलं मे ।
दत्वा त्वं चरणस्पर्शं मे नय दिव्यत्वं धूलिधनं माम् ॥
अह धरायाः प्रणते रूपं जातमिहास्मि प्रभो ! त्वदर्थम् ॥८॥

ता — वत्से ! अहं ते वचः किमपि किमप्यवगच्छामि । त्वं नारी वर्त्तसे सेवायामेवते राज्यमस्ति । नारी एव क्षणनैकेन जातेर्भितिभेत्तुं शक्नोति । सर्वा एव राजमहिष्या अंशं ग्रहीतुं शक्नुवन्ति, यदि भाग्यस्यावरणमपसरेत् । त्वया तु सुयोगोऽसौलब्ध आसीत् । मृगयार्थं बहिर्निर्गतोऽसौ राजकुमारस्तवैव कूपमिममुपागतः । कच्चित् स्मरसि तत् ?

तेः — आम् स्मरामि तत् ।

। — राज्ञो गृहं कथं न गतासीः ? स तु तव रूपं विलोक्य मुग्धतामयासीत् !

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रकृतिः — मुग्धतां त्वयासीदेव। स विस्मृतवान् यदहं मनुष्योऽस्मीति। पशोराखेटार्थं निर्गतस्य तस्याक्ष्णोः केवलं पशुरेवासीत्। तमेव पशुं स सुवर्णशृङ्खलायामाबद्धुमियेष।

माता — ततः स आखेटकं मत्वा मुखं ते लक्ष्यीकृतवान्। अथ भिक्षुरसौ त्वां नारीं मत्वाऽभिज्ञातवान्?

प्रकृतिः — त्वं नैवावगमिष्यसि मातस्त्वं नैवावगमिष्यसि। अहमवगच्छामि, इयद्दिनान्तरं प्रथमतः स एव मामभिज्ञातवानस्ति। महदाश्चर्यमिदम्।

त्वया मदक्ष्णोः पुरतः प्रसार्य सत्यस्य दृष्टिं मम सत्यरूपम्।
विमयि सर्वप्रथमं मदीयं रूपं समेषां निदधे समक्षम्॥
अहं प्रणामं प्रणयेन तुभ्यं निवेदयामि प्रमुदा गृहाण।
प्रभो प्रणामं शतवारमेतं भक्त्या विनम्रा विनिवेदयामि॥
लेखाऽहमासे तरुणारुणस्य रेखा च कान्तेरतिनिर्मलायाः।
प्रसादवृष्टिः प्रथमाऽहमस्मि नवीननीलस्य बलाहकस्य॥
अहं प्रणामं प्रणयेन तुभ्यं निवेदयामि प्रमुदा गृहाण।
प्रभो प्रणामं शतवारमेतं भक्त्या विनम्रा विनिवेदयामि॥९।

अहं तमभिकामये, अवश्यमभिकामये। तस्य पुरतोऽहमस्य जन्मनः पूजायाः समग्रमुपहारं सञ्चित्य स्थापयितुमिच्छामि। तेन तस्य चरणौ शुचितां न विहास्यतः। लोका मे स्पर्द्धामवलोकयन्तु। अहं सगर्वमिदं वक्तुमिच्छामि यदहं तव सेविकास्मि। अन्यथा मया संसारेऽस्मिन् सर्वेषां पादमूलेषु दासीरूपया स्थातव्यं भविष्यति।

माता — पुत्रि! त्वं मिथ्यैव कथं क्रुद्धाऽसि। दासीरूपमेवतु तव जन्म। विधातुर्लिखितं कः प्रोज्झितुं समर्थः?

प्रकृतिः—धिक्,धिक् मातः! अहं त्वां पुनर्ब्रवीमि-मा विस्मर, मृषैवात्मनिन्दां मा कार्षीः। आत्मनिन्दा पापमस्ति, पापमस्ति। अहं दासी नास्मि, चाण्डालकन्या च नास्मि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माता — त्वया सहकथमहं सम्भाषे, इति न वेद्मि। तदस्तु, अहं स्वयमेव तदन्तिकं यास्यामि। तस्य पादयोः पतित्वा निवेदयिष्यामि, यत् त्वं सर्वेषां गृहे अन्नग्रहणं करोषि, मद्गृहे केवलमेकचुलुकं जलं ग्रहीतुमागच्छ।

प्रकृतिः — न हि, न हि, तमहं वहिस्तो नाकारयिष्यामि, नाकारयिष्यामि। अहं तमाह्वातुं शक्ष्यामि चेदन्तस्त एव तमाह्वास्यामि, तमाहूय आनेष्यामि च। समर्पणस्य व्यथा मे हृदयं व्याकुलीकरोति। न जाने ग्रहीता जनः कुत्र गच्छति। आदानप्रदानयोरिदं मेलनं मम जीवने कदा सम्भविष्यतीति न जाने। मम वेदना तस्य वेदनया न सम्मिलिष्यति किम्? गङ्गाधाराया यमुनायाः कृष्णधारया सह सङ्गमो न भविष्यति किम्?

नैव जाने न्यनादीत् स्वयं कःस्वरो
यः स्वयं वर्तते आत्मनैवागतः।
स्थानतोऽस्माद्यदाप्रस्थितोऽसौतदा
दत्तवान्प्रीतिमत्वात् स आशावचः ॥१०॥
यदा धराया हृदयं विदीर्णं वृष्टेरभावाद् भविता तदा नु।
जलस्य पात्रो जलसञ्चयेन प्रयोजनं सेत्स्यति किं धरायाः ॥११॥
नवाम्बुभिर्वारिधरोऽतिनम्रः स्वयं धरायां विहितानुरागः।
आकाशमाच्छाद्य कृतत्वरः सन् स्वयं धरां नाऽभ्युपपत्स्यते किम् ॥१२॥

माता — एतत् सर्वं कथयित्वा किम्?

मेघः स्वयमागन्ता चेदागमिष्यति, नैवागन्ता चेन्नागमिष्यति। कृषिः शुष्यतु नाम, कस्तां गणयति? वयन्तु केवलमाकाशं सतृष्णमवलोकयामः किमन्यत् कर्तुं शक्नुमः?

प्रकृतिः — एतन्न भविष्यति। अहमवलोकयन्त्येव न स्थास्यामि। त्वं तु मन्त्रं वेत्सि। मन्त्रोऽसौ मे बाहुबन्धनमवत्, तमाकृष्य समानयेत्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माता — अयि सर्वनाशिनि ! किं कथयसि त्वम् ? पश्यामि, तव साहसो वर्द्धत एव। त्वमग्निना क्रीडसि। एते किं साधारणजनाः सन्ति ? किमेतेष्वहं मन्त्रप्रयोगं करिष्यामि ? एतदाकर्ण्य मे हृदयं भयेन कम्पते।

प्रकृतिः — राजकुमारं प्रति त्वं मन्त्रप्रयोगं कर्तुमुद्यताऽभवः, केन साहसेन?

माता — अहं राज्ञो न बिभेमि। स मां शूलमारोपयितुं शक्नोति। परन्त्वेते तु किमपि न कुर्वन्ति।

प्रकृतिः — अहमन्यस्मात् कस्मादपि वृत्तान्तान्न बिभेमि। केवलं बिभेम्यस्मादेव वृत्ताद् यदहं नीचैर्नावतरेयम्, न वात्मानं विस्मरेयम्, न च पुनस्तमन्धप्रकोष्ठं प्रविशेयम्। तत्तु मरणादप्यतिरिच्यते। स आनेतव्य एव। इयतीं गुरुवार्तामहमियता बलेन कथयामि, किमियमाश्चर्यस्य वार्त्ता न ? एतदाश्चर्यमेव तु तेन संघटितमस्ति। किमितोऽप्यधिकमाश्चर्यं न भविष्यति, स किं मत्समीपं नेष्यति ? किं स मेऽञ्चलस्यार्धभागे स्थानं न ग्रहीष्यति ?

माता — तमहं सम्भवत आनेतुं शक्नोमि। किं त्वं तस्य मूल्यं प्रदातुं शक्ष्यसि ? तव किमपि नावशेषिष्यते।

प्रकृतिः — न हि, मे किमपि नावशेषिष्यते। एतन्मे जन्मजन्मान्तरस्य दायित्वमस्ति। किमप्यवशिष्टं न स्थास्यति। सकृदेव सर्वस्वं समर्प्यैवाहमवशिष्टा स्थास्यामि। एतदर्थमेव त्वहमभिकामये तम्। किमपि न स्थास्यति मे। मम जन्मजन्मनां प्रतीक्षाऽस्मिन्नेव जन्मनि सार्थकतामेष्यति। अत एव त्वियमाश्चर्यवार्त्ता मया श्रुता—'जलंदेहि'। अद्य मया ज्ञातं यदहमपि दातुं शक्नोमि। सर्वैरेव वार्तेयं मत्तो निगूह्य निहिताऽऽसीत्। अहं दास्यामि, दास्यामि, अद्याहं मम सर्वस्वमर्पयिष्यामि। अत एवाहं तं प्रतीक्षमाणा स्थिताऽस्मि।

माता — किं त्वं धर्मं न मन्यसे ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रकृतिः --- एतत् कथं कथयामि ? अहं तमेव मन्ये, यो मां मन्यते। यो धर्मोऽवमाननां करोति, स मिथ्याऽस्ति। सर्वैरेव मे अक्षिणी निमील्य, मुखं च मे पिधाय मयाऽसौ धर्मः स्वीकारितः। किन्तु तद्दिवसादारभ्य तस्य धर्मस्य पालनं मत्कृते निषिद्धमस्ति। मम काचन भीतिर्न। त्वं स्वं मन्त्रमुच्चारय—भिक्षुमाकृष्य चाण्डालकन्यायाः समीपमानय। अहमेव तस्य सम्मानं करिष्यामि। इयन्तंमहान्तं सम्मानं तस्य कोऽपिकर्तुं न शक्ष्यति।

अह विजानामि तमेव केवलं
जनो हि यो मां मनुते स्वकं जनम।
जनस्तु यो मे कणिकेऽस्ति भागवान्
ममापि भागः कणिकेऽस्ति तस्य हि ॥१३॥
वो जनो मां परिज्ञातुं शक्नोति स्वयमात्मना।
शक्नोमि तं परिज्ञातुं परिज्ञानेन तेन हि ॥१४॥
एक एव प्रकाशोऽस्ति मार्गे परिचयस्य नौ।
प्राणेषु वर्त्तते तस्य यश्च प्राणेषु मेऽपि सः ॥१५॥
यैरात्मतमसोध्वान्ते स्वयमात्मा निगूहितः।
अहं तेषु स्वमात्मानं पश्यामि न कथञ्चन ॥१६॥
सस्पृश्य स्वर्णकाष्ठेन निद्राया मेऽवगुण्ठनम्।
तेनापसारित तस्माद् दृष्टिर्मे तन्मुखोन्मुखी ॥१७॥

माता — त्वमभिशापान्न विभेषि किम् ?

प्रकृतिः — अभिशापेन त्वहं जन्मत एव ग्रस्ताऽस्मि। एकस्याभिशापस्य विषेणापरं विषमुपशाम्यति। मातः ! अहं कामप्यपरां वार्तां नाकर्णयिष्यामि नाकर्णयिष्यामि नाकर्णयिष्यामि। मातः प्रयुज्यतां त्वरितं सोढुमशक्ताऽस्मि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

माता --- भवतु, ब्रूहि. तन्नाम किम् ?

प्रकृतिः --- नाम्ना स आनन्दोऽस्ति ।

माता --- आनन्दः ! भगवतो बुद्धस्य शिष्यः ?

प्रकृतिः --- अथकिम् ! स एव भिक्षुः ।

माता --- त्वं, मे हृदयस्य निधिरसि, त्व मम नेत्रयोर्मणिरसि । त्वत्कथने-नैवाहमियति महति पातके हस्तं निक्षिपामि ।

प्रकृतिः --- कीदृशं पातकम् ? यः सर्वानात्मसमीपमाकर्षति, तमेवाहमाकृष्य स्वसमीपमानेष्यामि । तत्र को दोषः ?

माता --- ते पुण्यबलान्मानवानात्मसमीपमाकर्षन्ति । वयन्तु मन्त्रबलादाकर्षामः — यथा पशुर्निगडेनाबध्य कृष्यते । वयं मन्थनं कृत्वा पङ्कमाहरामः, तेऽमृतमाहरन्ति ।

प्रकृतिः--- तत्तु वरमेव, वरमेव, अन्यथा पङ्को निःसारयितुं न शक्येत ।

माता --- (ध्यानमभिनीय) अहो ! त्वं महापुरुषोऽसि । अपराधस्य शक्तिर्मयि यावती विद्यते, ततोऽप्यधिका शक्तिस्त्वयि क्षमाया वर्तते । अहं तवापमानं कर्तुमुद्यताऽस्मि, त्वं मे प्रणाममङ्गीकुरुष्व ।

प्रकृतिः --- मातः ! त्वं कस्माद् बिभेषि ? मातुर्मुखेन त्वहमेव मन्त्रं पठामि । मदीया वेदना यदि तमाकृष्यानयति, अयमेवापराधश्चेत्, तदापराधमिमं करिष्यामि, करिष्याम्येव । यस्मिन् विधाने केवलं शासनमेव, सान्त्वना न, तद् विधानमहं नानुवर्त्स्यामि ।

माता—प्रकृते ? ते साहसोऽतीव महान् वर्त्तते ।

प्रकृतिः—मे साहसः ! तस्य साहसबलन्तु विचारय । यद्वृत्तं मां कोऽपि कथयितुं नाशकत्, तत् स सहजमेवाकथयत्—'जलं देहि' कियल्लघु वृत्तम्? किन्तु तस्य तेजः कियन्महत्? मम समस्तमेव जन्मालोकितं तेन। हृदयोपरि चिरान्निहितं कृष्णं शिलातलं तेनापसारितम् । ततो रसस्थ

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

धारा वेगादुच्चचाल ! तव भीतिरियं मिथ्याऽस्ति, यतोऽसौ ते दृष्टिपथं नायातः। कृत्स्नमेव प्रातस्तेन श्रावस्त्यां भिक्षाटनेऽतिवाहितम्। अनावृतं भू-भागं श्मशानस्थलञ्चोल्लंघ्य स नदीतटमनुचलन् रवेः प्रखर-किरणान् शिरसि सहमानः समागतः। किमर्थम् ? मादृशीं बालिकां केवलमिदमेव कथयितुमागतः — 'जलं देहि' अहं म्रिये, मातः ! अहं म्रिये। कुत इयती दयाऽवतीर्णा, कुत एतावान् स्नेहोऽवतीर्णः ? अवतीर्णश्च स तां भीरुं प्रति या सर्वेभ्योऽयोग्यतया वर्तते। अहं कस्मादन्यस्माद् बिभेमि —जलं देहि। तदेव जलं यन्मे जन्मेदमापूर्योच्छलितमस्ति। अदत्वा तदहं नैव जीविष्यामि। 'जलं देहि'। क्षणादेव मया ज्ञातं यन्मे पार्श्वे जलमस्ति तथा तदसमाप्यमस्ति—तदहं कस्मै निवेदयिष्यामि ? अत एव त्वहमहर्निशं तमाह्वयामि। स न शृणोति चेत्, मेभयं न--त्वं स्वं मन्त्रमुच्चारय। सहिष्यते सः, सहिष्यते।

माता— प्रकृते ! भूभागस्यास्य तत्पार स्थितेन मार्गेण कोऽसौ पीतवसनो गच्छति ?

प्रकृति,— स एव तु, तद् यदहं पश्यामि सर्व एव ते संघस्य श्रमणाः सन्ति। शृणोषि न, ते मन्त्रं पठन्ति। (ततः प्रविशति सशिष्य आनन्दो यथानिर्दिष्टकर्मा)

बुद्धो सुसुद्धो करुणामहाणंवो
योच्चन्त सुद्धब्बर—ज्ञानलोचनो।
लोकस्स पापूपकिलेसघातको
बन्दामि बुद्धं अहमादरेण तम्।
(पठन्तः सर्वे निष्क्रामन्ति)

प्रकृतिः-- (आनन्दं निर्दिशन्ती) मातः ! असौ यः सर्वेषामग्रतो व्रजति ! इमं कूपमभि तेन व्यावृत्यावलोकितमपि न ! पुनरेकवारमपि तु तेन प्रोक्तं स्यात्--जलं देहि। अहं तु विजानामि स्म यदसौ मां परित्यज्य न यास्यति-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अहं तस्य करस्य नूतना सृष्टिर्यदस्मि । (उपविश्य वारम्वारं भूमिं शिरसा प्रणमन्ती) इयमेव मृत्तिका , इयमेव मृत्तिका तु तवात्मनो वर्त्तते —हतभागे ! त्वं क्षणाय केन प्रस्फुटीकृताऽभवः ? किं सा दया आसीत् ? अन्ते त्वस्यामेव मृत्तिकायां पतनमभूत्-सदैवास्यामेवमृत्तिकायां निनीष स्थातव्यं भविष्यति, मार्गे गच्छन्ति ये तेषां पादानामधस्तात् ।

माता—वत्से ! विस्मर सर्वमेतत्, विस्मर । तव क्षणस्यैकस्य स्वप्नं भग्नं कुर्वाणास्ते गच्छन्ति, गच्छन्तु ते, गच्छन्तु ।यद् वस्तु स्थायि न, तद् यावच्छीघ्रं गच्छेत् तदेव वरम् ।

प्रकृतिः-इयं प्रतिदिनस्य कामना, अयं प्रतिक्षणस्यापमानः, हृदयाभ्यन्तर पञ्जर वद्धस्य पक्षिणः पक्षान् विस्फारयतो मरणम्-- किमयमेव स्वप्नो निगद्यते ? यो हृदयस्य सर्वाः शिरा निगृह्य स्थितस्तयातास्त्यक्तुमपि नेच्छति, किं स एव स्वप्नः ? तथा ते लोका येषां किमपि बन्धनं नास्ति, येषां किमपि सुखं दुःखं वा नास्ति, येषामुपरि संसारस्य कोऽपिभारो न, तथा ये च शारदा मेघा इवोड्डीयमाना विचरन्ति—त एव जागरिताः सन्ति ! किं ते स्वप्ना न सन्ति ?

माता—तव कष्टं द्रष्टुं न पार्यते ! प्रकृते ! त्वमुत्तिष्ठ । अहं तं मन्त्रकलादाकृष्यानेष्यामि । तमहं भूलिपथेनैवाकृष्यानेष्यामि । अहं किमपि वस्तु न कामये । एष यस्तस्याहङ्कारोऽस्ति तमहं भग्नं करिष्यामि । "अहं-कामये, अहं कामये", इत्यभिदधानः स स्वयमेव धावन्नागमिष्यति ।

प्रकृतिः— मातः ! तव मन्त्रः जीवसृष्टेरादिकालस्यास्ति । एषां मन्त्रोऽपरिपक्वोऽस्ति, एष स्वल्पदिनानामस्ति। ते तव मन्त्रेण सह योद्धुमसमर्थाः। तव मन्त्रस्याकर्षणेन तेषां मन्त्रस्य ग्रन्थिर्भग्नो भविष्यति । तैः पराजितैरेव भवितव्यम्, पराजितैरेव भवितव्यम् ।

माता— ते सर्वे कुत्र गच्छन्ति ?

प्रकृतिः— ते गच्छन्ति, इत्येवाहं जाने, किन्तु ते गच्छन्ति क्वापि न । कतितिचिद्दिनेभ्यः परं वर्षर्तुरेष्यति, तदा ते चातुर्मास्ये स्थास्यन्ति। ततः परं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ते गमिष्यन्ति, न जाने कुत्र ! इदमेव ते जागरणं कथयन्ति ।

माता —उन्मत्तिके ! तन्मन्त्रस्य वार्तां किं करोषि ? ते कियद्दूरं गताः सन्ति कुतस्तमहं प्रत्यावर्त्तयिष्यामि ?

प्रकृतिः—यत्र कुत्रापि गच्छेदसौ प्रत्यावर्त्तयितव्य एव, स तव मन्त्रस्य दूरवर्ती न ।

यद्यसौ याति जलधेस्तटं गच्छतु गच्छतु ।
पुनरेतु पुनश्चासौ प्रत्यावृत्येतु साम्प्रतम् ॥१९॥
आसनं हृदि विस्तार्य तत्र तं स्थापयाम्यहम् ।
अश्रुभिः क्लेदयिष्यामि धूलिं मार्गे च संस्थिताम् ॥२०॥
यदि व्रजति व्रजतु गिरिशृङ्गं व्रजत्यसौ ।
पुनः प्रत्याव्रजेन्नूनं पुनः प्रत्याव्रजेदसौ ॥२१॥
अहं गिरिगुहागूढाऽऽकारयिष्यामि तं भृशम् ।
तस्य जागरणं स्वप्नो मे पर्यावृत्य वर्त्स्यति ॥२२॥

असौ मे नादमत, अहमपि तस्य न दयिष्ये । तव यो निष्ठुरो मन्त्रस्तं पठ मन्त्रस्य प्रत्येकतन्तोरावर्त्तने तस्य मनो बधान। मामुल्लङ्घ्य क्व यास्यति, क्व यास्यति ?

माता— मा शुचः । असाध्यं न भविष्यति । अहं ते मायादर्पणं दास्यामि । तं हस्ते गृहीत्वा त्वं नर्तिष्यसि । तस्य छाया तत्रापतिष्यति । तस्मिन् दर्पणे त्वं द्रक्ष्यसि—तस्य किमभूत्, स कियद् दूरमागतश्चेति ।

प्रकृतिः— पश्य-पश्चिमे नभसि मेघः समुत्थितः, झञ्झावातस्य गेघः । मन्त्रः सफलो भविष्यति' सफलो भविष्यति । शुष्कसाधना शुष्कं पत्रमिवोत्पतिष्यति । दीपो निर्वाणमेष्यति । मार्गो नावलोकयिष्यते । स व्यावृत्य द्वारमिदमायास्यति—यथा निशीथे झञ्झावातकाले भग्ननीडो विहगस्तमसावृते प्राङ्गणे आपतति । हृदये आन्दोलनं भवति, मनसि विद्युच्चकास्ति । यस्मिन् सागरे फेनिलास्तरङ्गा उत्तिष्ठन्ति तस्य पारं न दृश्यते ।

माता— अधुनापि चिन्तय । मध्ये भयेनातङ्किता तु न भविष्यसि ? अपि धैर्ये

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

स्थैर्यं स्थास्यति ? मन्त्रस्य गतिर्यदा तीव्रतां प्राप्स्यति, तदा सहसा तमवरोद्धुं प्रयतनेन मे प्राणा निर्गमिष्यन्ति, दाहस्य सर्वाणि वस्तूनि यदा भस्मसाद् भविष्यन्ति तदा वह्निःशममेष्यति, इदमेव मनसि निधेहि ।

प्रकृतिः– त्वं कस्य कृते भयं कुरुषे ? किं स तादृशो जनः । केनापि वस्तुना तस्य किमपि न भविष्यति । अग्नेर्मार्गं स पदाक्रान्तं कुर्वन् यावदन्तमागच्छेत् । अहं त्वमनोऽभ्यन्तरं पश्यामि–अभितः प्रलयनिशाम्, मिलनझञ्झावातम्, भग्नताया आनन्दञ्च ।

हृदये डमरोर्मन्द्रो गुर्-गुर ध्वनिरुत्थितः ।
भ्रुवोः सघनमेवस्य जाते वक्रेऽथ कुञ्चिते ॥२३॥
वनं वनं पुलकितं सर्वतो वर्त्ततेऽधुना ।
तथा च मलनस्वप्ने न जाने हृदयस्य कः ॥२४॥
अतिथिर्लोलहिन्दोले आन्दोलयति सर्वदा ।
रजनी सघनवर्षाशब्दैर्मुखरिता तथा ॥२५॥
बज्रेण चकिता वस्ता वेपते भयविह्वला ।
कम्पयते च कल्लोलैः पल्लवान् माधवी लता ॥२६॥
झिल्लीरवैश्च सहसा सर्वतोऽथ समुत्थितैः ।
आशङ्कितमिवाभाति कृत्स्नमेव हि काननम् ॥२७॥

मात,– अस्तु, त्वदर्थमहं मन्त्रप्रयोगं करोमि । देवीमन्दिरं गच्छावः ।

(उभे निष्क्रान्ते)

—:+:—

द्वितीयोऽङ्कः

(प्रथमं दृश्यम्)

(स्थानम् – एकं जीर्णं शून्यं देवीमन्दिरम्, प्रकृतेर्माता पूजासने उपविष्टा, परितः पूजासामग्री सन्निहिता, प्रकृतिः सम्मुखीना स्थिता, माता मायाहर्षेणेदम् पूजां कृत्वा स्वानमभिनीय, मायाकर्षणमभिमन्त्रयति । ततः सा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized by Siddhanta eGangotri Gyaan Kosha

सर्वतः सर्षपान् विकीर्य मायादर्पणं प्रकृत्यै ददाति ।)

माता— वत्से ! मायादर्पणमिममवलोकय ।

प्रकृतिः—(दर्पणमगृहीत्वैव) न हि, मातः ! हृदय विदीर्णं भविष्यति । अहं दर्पणं नावलोकयिष्यामि, नावलोकयितुं शक्ष्यामि । दुःखस्य कियद् भयङ्करं वात्याचक्रमिदम् । वनस्पतिः किमन्ते भर-भर ध्वनिं कृत्वा धूलिसाद्भविष्यति ? तस्याभ्रभेदि गौरवं भग्नं भविष्यति किम् ?

माता— पश्य वत्से ! अधुनापि कथयसि चेदात्मनो मन्त्रमहं परावर्तयिष्यामि तेन मे धमन्यश्छिन्ना भवन्ति प्राणाश्च निर्गच्छन्ति चेत् तदपि वरम् किन्तु तस्य महाप्राणस्य रक्षा भवेत् ?

प्रकृतिः—मातस्तदेव वरम् । तव मन्त्रस्तिष्ठतु । तस्यावश्यकता नास्ति । नहि, नहि, अधुना मार्गः कियद् दूरं वर्त्तते? शेषपर्यन्तं स आयास्यत्येव, आयास्यत्येव स मे हृदयस्यान्तिकम् । ततः परमहं स्वं समस्तं संसारमुच्छिन्नं कृत्वा सर्वं दुःखं दूरीकरिष्यामि । गम्भीरनिशायां पथिकः समेष्यति हृदयस्याविकलज्वालया प्रदीपं ज्वलयिष्यामि । गभीरे हृदयाभ्यन्तरे सुधा या वन्या विद्यते, यस्या जलेनाह तस्याभिषेकं करिष्यामि यः श्रान्तः, तप्तः क्षतविक्षतश्च । पुनश्च स वारमेकमभ्यर्थयिष्यते 'जलं देहि—मम हृदयजलनिर्वेजलम् । अद्यो दिवस आयास्यति । प्रयुज्यतां मन्त्रः, मंत्रः प्रयुज्यताम् ।

अहं स्वदुःखेन हृदि स्थितेन दूरीकरिष्ये तव दुःखजातम् ।
जलेऽतलेऽस्मिन् विपुलव्यथाया अहं तव स्नानविधिं विधास्ये ।१।
तथा च ससारमहंहिकृत्स्नं यदात्मनः प्रज्वलितं करिष्ये ।
मोहस्य कालुष्यमिदं मदीय सर्वं विनष्टं भविता हि तेन ।।२।।
मरणस्य व्यथामेतां मानसीं मे दुनोति या ।
उपायनीकरिष्यामि सादरं ते पदाब्जयोः ।।३।।

माता— वत्से ! नाहमविवं यदियाम विलम्बो भविष्यति । जाने मन्त्रो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

मे समाप्तिमेष्यति । मे प्राणाः कण्ठं यावदागताः सन्ति ।

प्रकृतिः— मा भैषीः, क्षणं सहस्व, स्वल्पं सहस्व । अधुनाऽधिको विलम्बो नास्ति ।

माता— आषाढ़ आरब्धः । तेषां चातुर्मास्यं तु प्रवृत्तमस्ति ।

प्रकृतिः—. ते वैशाख्याः गोशिरसंघं गताः सन्ति ।

माता—त्वं कीदृशी निष्ठुराऽसि ? स्थानं तु तदतीव दूरं वर्त्तते ।

प्रकृतिः—अतिदूरं नास्ति । अधुना केवलं सप्तदिवसीयो मार्गोऽवशिष्टः । पञ्चदश दिवसास्तु व्यतीताः । एतावद्दिनानन्तरं तस्यामनं विचलितमिति प्रत्येमि । आयाति, आयाति, योऽतीवदूरे स्थितः, यश्च लक्षयोजनदूरं वर्त्तते, यस्तु सूर्याचन्द्रमसोरपि परस्तात् स्थितः, यो हि ममः तव चाधिगमादसीमदूरं वर्त्तते, स एव समीपमायाति । आयाति, हृदयं मे भूचालेन परिकम्पते ।

माता—मया मन्त्रः सर्वाङ्गः सम्पूर्णतां नीतः । एष वज्रपाणिमिन्द्रमप्याकृष्यानेतुमशकत् । पुनरपि विलम्बो जायते । किं मरणान्तकं युद्धं चलिष्यति ? वत्से ! दर्पणमिममवलोकय । (दर्पणं ददाति, प्रकृतिर्दर्पणमवलोक्य किञ्चिदिव सम्भ्रान्ता तिष्ठति ।)

मता— त्वं दर्पणं किं पश्यसि ?

प्रकृतिः— पश्यामि यत् तस्य सर्वाङ्गमावेष्ट्य वह्निः प्रज्वलति । मम शोणितं शैत्यमापद्यते । त्वं शिव इव स्थिरदृष्टिः, स्थाणुरिवाचला उपविष्टाऽसि । तव श्वासगतिरविच्छिन्नास्ति । मन्ये, तवाभ्यन्तरं क्वचिद् धग्धगिति कृत्वाऽग्निः प्रज्वलति । येनाग्निनाऽसावात्मानमावृत्य स्थितः, तमग्निं तवाग्निनागः सफुत्कार दंष्टुमारब्धः । द्वन्द्वयुद्धं प्रवर्त्तते ।

माता— किं त्वं बिभेषि ?

प्रकृतिः— न हि । मे मनस्युन्मत्तमेकमानन्दपुष्पं विकसितं दृश्यते । तदहं किं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वच्मि'। तदहं वक्ष्यामि नूतनसुष्टेविराटवैराग्यमिति। यत्र काचन भावना, भयं न, दया न, दुःखं न। सर्वं छिद्यते, दह्यते, गलति च। सर्वतः स्फुलिङ्गो विकीर्यते। अहमिदानीं स्थातुमसमर्थोऽस्मि। मम समस्तं शरीरं मनश्च नृत्यतः।

(गायन्ती नृत्यति)

हे महादुःख ! हे प्रलयङ्कर !
हे शङ्कर ! हे रुद्र ? भयङ्कर !
जटाविनिर्गतवह्निभुजङ्गम-
वंशैर्भवतः स्थावरजङ्गम-
जातं द्रुततरमिह जर्जरितम्।
घन-घन-झनझन-झनन-ध्वनिना
कुरु टङ्कृतं पिनाकं त्वरितम्।
हे शङ्कर ! हे रुद्र ! भयङ्कर !
हे महादुःख ! हे प्रलयङ्कर ॥४॥

(नृत्यावसाने पुनः दर्पणं पश्यति)

माता—त्वमात्मनो भिक्षुकं कीदृशं पश्यसि ?

प्रकृति.— पश्यामि यत् स गोधूलेर्नभोनक्षत्रमिव निर्निमेषदृष्ट्या सुदूरमवलोकयति। पुनश्च पश्यामि यत् स गभीरनिशायां शनकैरुत्थाय, श्रमणान-वेदयन् तूष्णीमेव वैशाल्याः सिंहद्वारमुल्लङ्घ्य, आत्मनः सर्वमन्तर्द्वन्द्वं दूरीकृत्य, मनसि किमप्यविचारयन् वनपथे एकाकी व्रजति। मनस्येका विह्वलता लक्ष्यते, शरीरे एका शिथिलता दृश्यते। मन्ये, तस्याक्ष्णोः पुरतः किमपि वस्तु नास्ति--सत्यमसत्यं वा नास्ति, भद्रमभद्रं वा नास्ति; एकं निश्चिन्तमन्धं लक्ष्यमस्ति, यस्य कोऽप्यर्थो न। (आनन्दस्तथाविधः पथि व्रजन् विलोक्यते)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

माता-- भवतु, अद्य तावदेवतावदेवास्तु श्वः पुनः. मन्त्रप्रयोगं करिष्यामि। एहि, गृहं प्रतिनिवर्त्तावहे (उभे निष्क्रान्ते)

—:+:—

स्थानम्—चाण्डालिकाया गृहप्राङ्गणम्। समयः रात्रेः प्रथमः प्रहरः। प्रकृतिस्तस्था माता च आसनद्वये उपविष्टे दृश्येते। वेद्यां पूजासामग्री सन्निहिताऽस्ति, दीपः प्रज्वलति।)

माता— (दर्पणमभिमन्त्र्य दत्त्वा च) वत्से! त्वमधुना दर्पणं पश्य। (प्रकृतिर्दर्पणमादाय पश्यति)

माता—अथ त्वमिदानीं भिक्षकं कुत्र पश्यसि?

प्रकृतिः—पश्यामि यत् स उपलीनद्यास्तटे पाटलग्रामे कस्यचन पुराणपिप्पलवृक्षस्याधस्ताच्चकित इव स्थितोऽस्ति। स्थानमिदं चिरपरिचितमिवास्ति तस्य। श्रूयते—अत्रैव शिलातले उपविष्टो भगवान् बुद्ध एकस्मिन् दिवसे राज्ञे सुप्रभासाय धर्मोपदेशमदात्। स हस्ताभ्यामुभाभ्यां मुखमावृत्योपविष्टः। मन्ये, सहसा स्वप्नभङ्गो जातः। मातः! रात्रिर्यामद्वयमतीत्य वर्त्तते। अधिकः समयो नास्ति, समयो नास्ति। मातः! निशामिमां व्यर्थतां मा नय। मन्त्रे स्वीयां समस्तां शक्तिमुपयुङ्क्ष्व।

माता-- वत्से। इतोऽधिकं कर्तुं न शक्नोमि। मन्त्रो दुर्बलतां गतः। मे शरीरं प्राणाश्चावशं गताः।

प्रकृतिः-- दौर्बल्येन कार्यं न सेत्स्यति। हताशा मा भव। (दर्पणं दृष्ट्वा) सम्भवतः प्रत्यावर्त्तनार्थमसौ मुखं व्यावर्त्य स्थितः। बन्धनेऽन्तिममाकर्षणं सञ्जातम्। किन्तु बन्धनमिदं चिरं न स्थास्यति। स ममास्य जन्मनः संसाराद् बहिर्गमिष्यति; ममावग्रहे स कथमपि न स्थास्यति। तदा तु स ममैव स्वप्नो भविष्यति। पुनरहं चाण्डालिकाया मायामूर्तिर्वर्त्तिष्ये। तदनृतं मे सह्यं न भविष्यति। मातस्ते पादयोः पतामि। भूयोऽप्येकवारं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्वीयां समस्तां शक्तिमुपयुङ्क्ष्व । अधुना त्वं 'वसुन्धरा' मन्त्रमारभस्व । येन पुण्यवतामाकाङ्क्षितः स्वर्लोको विचलितो भवेत् ।

(गायन्ती)

मातःवसुन्धरेऽहं जातास्मि धूलितस्ते,
तन्मे मनुष्यजन्म त्वं सार्थकं कुरुष्व ।
जानाम्यहं शुचिं त्वां पुण्यां स्वजन्मभूमिम्,
प्राणेषु पुण्यपूर्णा धन्यास्मि मर्त्यबाला ।,
स्वर्गायं ते च कस्मै त्वां मन्वतेऽतितुच्छाम्;
श्रद्धामयि ! त्वदीये क्रोडे स्थितास्मि रम्ये ।
मातस्तवैव वर्ते ते सन्निधौ स्थितास्मि,
त्वं मोहिनीं स्वशक्तिं प्राणेश्वरि ! प्रयच्छ ॥५॥

माता— यथाहं त्वामवदम्, तथा त्वं प्रस्तुतासि ?

प्रकृतिः— आम् ! ह्यः शुक्लद्वितीयाया रात्रिरासीत् । मया गभीरानद्यामवगाहनस्नानं कृतम् । अक्षतान्, दाडिमकुसुमम्, सिन्दूरम्, सप्तरत्नं च दत्त्वा मया, चक्रमङ्कितम्, पीतवस्त्रपताका, स्थापिता, स्थाल्यां मालाचन्दनं सज्जीकृतम्, तथा दीपः प्रज्वालितः । स्नानानन्तरं मया धान्याङ्कुरवर्णं वस्त्रं परिहितम्, चम्पकवर्णमुत्तरीयञ्च धृतम् । ततः पूर्वाभिमुखमुपविश्याहं समग्रां रजनीं तस्य मूर्तिं ध्यातवती । स्वर्णिभे सूत्रे षोडशग्रन्थीन् निर्माय मया रक्षासूत्रमिव तत् स्वहस्ते बद्धम् ।

माता— अस्तु, त्वमावाहनपीठं विधेहि, प्रदक्षिणां कुरु, अहं वेदीमभितो मन्त्रं पठामि ।

प्रकृतिः— मे रुद्धविकासे मुकुलदले सौरभममृतमादायेहि ।
मे उपेक्षितेऽस्मिन् तिमिरतले गौरवनिशीथमादायेहि ।
मे मूल्यविहीनायां शक्तौ मुक्ताकणिकामादायेहि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

मे मौनविपञ्चीतारेषु संगीतममरमादायेहि ।
द्रुतमेहि उषाया आह्वाने, द्रुतमेहि निशाया अवसाने ।
द्रुतमेहि शुचिस्मितशुक्रतारे, द्रुतमेहि हिमाम्भोऽश्रुकधारे ।
सीमन्तमुषाया पूरयितुं निजरश्मिमरुणमादायेहि ॥६॥

माता— प्रकृते ! त्वमिदानीं स्वं दर्पणमवलोकय । किं पश्यसि यत् कृष्णवर्णा छाया वेदिकायामापतितास्ति ! मे वक्षो विदीर्णतामेति, अहं सोढुमशक्तास्मि । पश्य दर्पणम्, अधुना कियान् विलम्बोऽस्ति ?

प्रकृति :— न हि, न हि द्रक्ष्यामि, न हि द्रक्ष्यामि । अहं तं स्वमनसि ध्याने च श्रोष्यामि । स दर्शनं ददाति चेत् तमहं सहसा सम्मुखमवलोकयिष्यामि । स्तोकं सहस्व मातः ! स दर्शनं दास्यति, अवश्यं दर्शनं दास्यति । पश्य, सहसा झञ्झावातः प्रवृत्तः, आगमनस्य झञ्झावातः । पादयोर्भरेण पृथ्वी प्रकम्पते, हृदयं मे वेपते ।

माता—हतभागे ! तवाभिशाप आगच्छति । त्वया त्वहं हतास्मि । मे धमन्यः स्फुटन्ति ।

प्रकृतिः— अभिशापो न, अभिशापो न । मम जन्मान्तरमायाति । मरणस्य सिंहद्वारमनावृत्तं जायते, वज्रप्रघणप्रहारेण द्वारं भग्नम्, प्राचीरं भग्नम्, इहजन्मनो मे समस्तमसत्यं भग्नम् । भयेन मे मनो वेपते, आनन्देन मे प्राणा उद्वेलिता भवन्ति । हे मम सर्वनाश ! हे मम सर्वस्व ! त्वमागतः ! त्वामहं मम सकलस्यापमानस्योत्तुङ्गशिखरे स्थापयिष्यामि । तव सिंहासनं निर्मास्यामि—लज्जया, भयेन, आनन्देन च ।

माता— मम समयः पूर्णतामुपैति । अधिकं न सहिष्ये । शीघ्रं स्व दर्पणमवलोकय । (ध्यानं नाटयति)

प्रकृतिः— (दर्पणं विलोक्य) मातः । बिभेम्यहम् । तस्य मार्गः समाप्तिमुपैति । ततः परं किम् ? केवलमहमेव ! नापरं किञ्चित् ! एतावद्दिनानां निष्ठुरं दुःखमनेन पूर्तिमेष्यति । केवलमहम् । कस्य कृते

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एतावान् दीर्घः, एतावान् दुर्गमः मार्गः ? अस्यावसानं कुत्र ? केवलं मयि !

(गायति)

मार्गस्यास्य समाप्तिः क्वास्ति, क्वास्ति समाप्तिः, शेषे किम् ?
इयं कामना इयं साधना व्रजतो निजमवसानं क्व ?
उद्गच्छन्ति विलीयन्ते च क्रन्दनकरुणतरङ्गा मे ।
पुरोवर्त्तते सघनं ध्वान्तं नैव दृश्यते पारं क्व ?
अद्य मनसि मे श्रान्ते क्लान्ते शोचामि स्वयमेवाहम् ।
अन्वेषे खलु मृगतृष्णायास्तृष्णायाः परितृप्तिः क्व ?
मनसि जायते भयमेतन्मे दिशाविहीना व्यथातरी ।
निरुद्देश्यमसहाया व्रजति श्रयति न जाने कूलं क्व ?।७।।

माता--- अयि निष्ठुरबालिके ! मम दयस्व । अहमितोऽधिकं सोढुमशक्ताऽस्मि । शीघ्रं दर्पणमवलोकय । (ध्यानं नाटयति) ।

प्रकृतिः--- (दर्पणं दृष्ट्वा प्रक्षिप्य च) अम्मो ! मातः ! अरी मातः ! तिष्ठ, तिष्ठ, तिष्ठ । स्वं मन्त्रं परावर्त्तय, परावर्त्तय । अधुनैव, अधुनैव । अरी राक्षसि ! त्वया किं कृतम्, किं कृतम् ? त्वं कथं मृता नाभूः ? किं पश्यामि ? अहो क्वास्तेऽसौ दीप्तोज्ज्वलः शुभ्रनिर्मलः सुदूरस्वर्गस्यालोकः ? कियान् क्लान्तः, कियान् म्लानः, आत्मपराजयस्य कियन्तं भारं बिभ्रदसौ मे द्वारमागतः । नतानन आगतः । अपनय अपनय, सर्वमिदमपाकुरु । (पादेनाहत्य मन्त्रस्योपकरणानि विकिरति) अरी ! त्वं चाण्डालिनी नासि चेद् वीरस्यापमानं मा कुरु । जयतु जयतु सः ।

(आनन्दः प्रविशति)

आनन्दः--- जलं देहि, मे पारणाया जलं देहि ।

(प्रकृतिः जलं पाययति, आनन्दः सस्नेहं जलं पिबति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रकृतिः--- (बद्धाञ्जलिः सती) प्रभो ! त्वं मामुद्धर्तुमिहागतः। अत एव त्वया एतावत् कष्टमधिगतम्। क्षमस्व। प्रभो। क्षमस्व। निःसीमां ग्लानिमिमां पादाघातेन दूरीकुरुष्व। त्वामहमाकृष्य भूमिमिमां नानेष्यञ्चेत् कथमिमं जनं त्वं स्वं पुण्यलोकं प्रापयिष्यः। हे निर्मल ! तव पादयोर्मलिना धूलिः संलग्ना, धूलेः संलगनं तत् सार्थकं भविष्यति। मम मायाया आवरणं भग्नतामेत्य तव पादयोः पतिष्यति, प्रमार्जयिष्यति च तव पादयोः सर्वां धूलिं ताम्। जय, प्रभो जय, प्रभो ! (पादयोः पतति)

माता-- (बद्धाञ्जलिः सती) प्रभो ! जय ! मे पापानि प्राणाश्च तव पादयोः पतिताः, तत्रैव मे दिनमवसितम्-- तव क्षमायास्तटमासाद्य। (पादयोर्निपत्य निष्प्राणतां याति)

आनन्दः— (हस्तमुद्यम्य)

"बुद्धो सुबुद्धो करुणामहार्णवो
योच्चन्त सुद्धब्बर-ञानलोचनो।
लोकस्स पापूपकिलेसघातको
वन्दामि बुद्धं अहमादरेण तम्।"
(जवनिकापातः)

॥ इति ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रकाशित निबंध

१ संस्कृतशिक्षाया विकासे विहारप्रदेशस्य योगदानम्
२ कालिदासस्य शाश्वतसंदेशाः
३ कालिदासस्य बालकाः तस्य वात्सल्यञ्च
४ कालिदासस्य कुसुमानि .
५ काव्यशास्त्री कालिदासः
६ कालिदासस्य साहित्यम् (A bibliography of Kalidasas-literature)
७ भारतीयोऽद्वैतवादः
८ मुद्राराक्षसे जातिवादः
९ रससिद्धान्तः– मम्मटाचार्यः
१० राष्ट्रिया अस्मिता, संस्कृतञ्च
११ संस्कृतं राष्ट्रगौरवम्
१२ संस्कृतसाहित्ये राष्ट्रियभावनाया विकासः
१३ कालिदासस्य युद्धविज्ञानम्
१४ कविः कः पदार्थः, कविकर्म किम् ?
१५ कालिदासस्य सौन्दर्यसृष्टिः
१६ देवस्य वर्त्तमानपरिवेशे कालिदासस्य प्रासङ्गिकता
१७ विहारगौरवं बाणभट्टः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

हमारे संस्कृत के प्रकाशन

१. संस्कृत वाङ्मय मे त्रैगुण्य	.... ३०-००
२. संस्कृते नारी शब्दचित्रावलि	.... १२-००
३. वैदिक वर्ण व्यवस्था और श्राद्ध	.... २०-००
४. महाभारत में रुद्र	.... २५-००
५. गीता, काण्ट, गाँधी एवं विनोवा	.... १५-००
६. पद पदार्थ विभाग परिशीलनम्	.... ४५-००
७. भारतीय दर्शनों में आत्मा	.... ३०-००
८. भगवान् श्री कृष्ण और शिवतत्त्व	.... २५-००
९. विज्ञप्ति मात्रता सिद्धि [अंग्रेजी अनुवाद सहित]	.... ४५-००
१०. शिरोमणि आख्यात शक्तिवाद [अंग्रेजी अनुवाद सहित]	.... ३५-००
११. धर्मद्रुमः धर्मशास्त्र का साङ्गोपाङ्ग वर्णन	.... ७५-००
१२. सुमति दर्शनम्	.... ३०-००

किशोर विद्या निकेतन

भदैनी : वाराणसी

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha